छादयित्वा, चिच्छादयिषित्वा, छदित्वा, चिच्छदिषित्वा, चाच्छदित्वा, छदयित्वा ;

प्रच्छाद्य, प्रचिच्छादयिष्य, प्रच्छद्य, प्रचिच्छदिष्य, प्रचाच्छद्य, [1]प्रच्छदय्य ;

छादम् २, छादयित्वा २, } चिच्छादयिषम् २, चिच्छादयिषित्वा २, } छादम् २, छदित्वा २, } चिच्छदिषम् २. चिच्छदिषित्वा २, }

चाच्छदम् २, चाच्छदित्वा २, } [2]छदम् २-छादम् २. छदयित्वा २ ; }

[3]छदिः, [4]छत्त्रम्, [5]छद्म.

(563) "छदि संवरणे" (X-चुरादिः-1577. सक. सेट्. उभ.)

'यौ वा णौ अपचारणे छदत इत्येकम्, द्वितीयं छदेत् [छदन्]

अन्यत् छादयति, छदेदिति पुनः स्यादूर्जनेऽर्थे मितः।

यत्तुच्छन्दयतीति णौ नुमि पदं, तत् संवृताविष्यते—' (श्लो-113) इति देवः। इदित्करणाण्णिचो वैकल्पिकत्वम्। छन्दकः-न्दिका, चिच्छन्दयिषकः-षिका, छन्दकः-न्दिका, चिच्छन्दिषकः-षिका, चाच्छन्दकः-न्दिका, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचिन्तयतिवत् (524) ज्ञेयानि। [A]छन्दन्-न्ती।

(564) "छमु अदने" (I-भ्वादिः-470. सक. सेट्. पर.) मित्।

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
2. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः।
3. औणादिके [द. उ. 9. 30] इसिप्रत्यये छदिः इति भवति। 'इस्मन्त्रन्क्विषु च' (6-4-97) इति, उपधाया ह्रस्वः। छादयतीति छदिः=चर्म, आवरणं च।
4. 'ष्ट्रन्' [द. उ. 8-79] ष्ट्रन् प्रत्यये, 'इस्मन्त्रन्क्विषु च' (6-4-97) इत्युपधाह्रस्वे रूपम्। छाद्यतेऽनेनेति छत्त्रम्=आतपत्रम्।
5. 'मनिन्' [द. उ. 6-73] इति मनिनि प्रत्यये छद्म=कपटम्।

A. 'छन्दन् शुचं बरमशिश्रिणदाश्रितानां सन्ताडनैर्वृषभदैत्यमखादयच्च॥' धा. का. 3-18.